শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীৰণ্শঠকোপ শ্রীশ্রীনিৱাস যতীন্দ্র মহাদেশিকৈরনুগৃহীতং

# ॥শ্রী রঙ্গনাথ মঙ্গলাশাসনম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী রঙ্গনাথ মঙ্গলাশাসনম্ ॥

শ্রীনিৱাস যতীন্দ্রাদীন্ গুরূন্নৎৱা মহাত্মনঃ।
তৎকৃপাপরতন্ত্রোঽহং কুর্ৱে যত্নং হরেস্স্তুতৌ॥ **1** ॥

শ্রীরঙ্গে রাজতে যোঽসৌ শ্রীরঙ্গে যশ্চ জাযতে।
তস্য শ্রীরঙ্গনাথস্য স্তৱং কুর্ৱে যথামতি॥ **2** ॥

শ্রীহস্তলালনানন্দি মৃদু পাদ সরোরুহে।
সর্ৱোত্তুঙ্গায নিত্যং স্যাৎ শ্রীরঙ্গেশায মঙ্গলম্॥ **3** ॥

শ্রীনিৱাস যতীশান গুরুৱর্যমৱেক্ষ্য মে।
সর্ৱাপরাধান্ ক্ষন্ত্রে স্যাৎ শ্রীরঙ্গেশায মঙ্গলম্॥ **4** ॥

শ্রীমৎকৌস্তুভরত্নাভা ভাসুরাযাসুরারযে।
ভূযাৎ শ্রীৱৎসৱক্ষায শ্রীরঙ্গেশায মঙ্গলম্॥ **5** ॥

শ্রীরঙ্গস্থল ৱাস্তৱ্য ভৱ্যভাগ্য ফলাত্মনে।
আত্মনে সর্ৱতো ভূযাৎ শ্রীরঙ্গেশায মঙ্গলম্॥ **6** ॥

শ্রীমদ্বেঙ্কটনাথার্য স্তুতিপ্রীত হৃদেঽনিশম্।
নিশীশায সদা ভূযাৎ শ্রীরঙ্গেশায মঙ্গলম্॥ **7** ॥

শ্রীমদিক্ষ্ৱাকুৱংশ্যানাং কুলার্থায মহাত্মনাম্।
সর্ৱদাযার্থিনাং ভূযাৎ শ্রীরঙ্গেশায মঙ্গলম্॥ **8** ॥

শ্রীমতে নিগমান্তৈকৱেদ্যাযাশেষশেষিণে।
প্রাপ্যায প্রাপকায স্যাৎ শ্রীরঙ্গেশায মঙ্গলম্॥ **9** ॥

শ্রী পরাঙ্কুশযোগীন্দ্র পদপদ্ম নিষেৱণাৎ।
লব্ধাত্মনা মযাঽকারি শ্রীরঙ্গেশ্ৱর মঙ্গলম্॥ **10** ॥

শ্রীনিৱাস যতীন্দ্রোক্তং শ্রীরঙ্গেশ্ৱর মঙ্গলম্।
যে পঠন্তি মহাত্মান স্তেষাং ভূযাৎ তু মঙ্গলম্॥ **11** ॥

॥ ইতি শ্রী রঙ্গনাথ মঙ্গলাশাসনং সমাপ্তম্ ॥